# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२९)

## ०२.०१.२०१२

# तकारान्ताः पुंलिङ्गाः

- ‘वर्तमाने पृषद्-बृहत्-महत्-जगत्-शतृवच्च’ (उ २४१) एते निपात्यन्ते, शतृवच्च एषां कार्यं स्यात् ।
- उगित्त्वात् नुम् ।
- ‘सान्तमहतः...’ इति दीर्घः ।
- मह्यते पूज्यते इति महान्, महान्तौ, महान्तः ।

- महत्  (सुँ) स्
- महन् त्     स्   (‘उगिदचां सर्वनामस्थानेऽधातोः’ - ७.१.७०)
- महान् त्   स्    (‘सान्तमहतः संयोगस्य’ - ६.४.१०)
- महान्  त्      (‘हल्ङ्याब्भ्यो...’ - ६.१.६८)
- महान्          (‘संयोगान्तस्य लोपः’ - ८.२.२३)

- महान्तौ, महान्तः ।
- हे महन् ।
- ‘सान्तमहतः..’ इत्यत्र ‘असम्बुद्धौ’ इति अनुवर्तते ।

- महान्तम्, महान्तौ, महतः ।
- महता, महद्भ्याम् इत्यादि ।

- तकारान्तः पुँल्लिङ्गः ‘धीमत्’ शब्दः ।
- धीः अस्य अस्ति इत्यर्थे धीशब्दात् मतुप् ।

# ४२५. अत्वसन्तस्य चाधातोः (६.४.१४)

- पदत्रयम् । अतु-असन्तस्य, च, अधातोः ।
- ‘ढ्रलोपे पूर्वस्य दीर्घोऽणः’ (६.३.१११) इत्यतः ‘दीर्घः’ इति, ‘नोपधायाः’ (६.४.७) इत्यतः ‘उपधायाः’ इति, ‘सर्वनामस्थाने चासम्बुद्धौ’ (६.४.८) इत्यतः ‘असम्बुद्धौ’ इति, ‘सौ च’ (६.४.१३) इत्यतः ‘सौ’ इति च अनुवर्तते ।
- अत्वन्तस्य उपधायाः दीर्घः स्याद् धातुभिन्न-असन्तस्य च असम्बुद्धौ सौ परे ।
- परं नित्यं च नुमं बाधित्वा वचनसामर्थ्याद् आदौ दीर्घः । ततो नुम् ।

- धीमत् (सुँ) स्
- धीमात् स् ('अत्वसन्तस्य चाधातोः' - ६.४.१४ - इति उपधादीर्घः)
- धीमान् त् स् ('उगिदचां...' - ७.१.७० - इति नुमागमः)
- धीमान् त् ('हल्ङ्याब्भ्यः...' - ६.१.६८)
- धीमान् ('संयोगान्तस्य लोपः' - ८.२.२३)

- धीमन्तौ, धीमन्तः ।
- हे धीमन् ।
- शसादौ महद्वत् ।

- धातोः अपि अत्वन्तस्य दीर्घः ।
- गोमन्तम् इच्छति, गोमान् इव आचरति इति वा क्यजन्ताद् आचारक्विबन्ताद् वा कर्तरि क्विप् ।
- ‘गोमत्’ इति तकारान्तं प्रातिपदिकम् ।
- ‘उगिदचाम्...’ इति सूत्रे अज्ग्रहणं नियमार्थम् ।
- ‘धातोश्चेदुगित्कार्यं तर्हि अञ्चतेरेव’ इति ।
- तेन ‘स्रत्’, ‘ध्वत्’ इत्यादौ न ।
- ‘स्रसु’, ‘ध्वंसु’ इति उगितौ धातू ।

- ‘अधातोः’ इति तु अधातुभूतपूर्वस्यापि नुमर्थम् ।
- गोमान्, गोमन्तौ, गोमन्तः इत्यादि ।

- ‘भातेर्डवतुः’ (उ. ६३)
- भवान्, भवन्तौ, भवन्तः ।
- शत्रन्तस्य तु अत्वन्तत्वाभावात् न दीर्घः ।
- भवतीति भवन् ।
- भवन्तौ, भवन्तः इत्यादि ।

# ४२६. उभे अभ्यस्तम् (६.१.५)

- पदद्वयम् ।
- 'एकाचो द्वे प्रथमस्य' (६.१.१) इत्यतः 'द्वे' इति अनुवर्तते ।
- षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः ।

# ४२७. नाभ्यस्ताच्छतुः (७.१.७८)

- पदत्रयम् । न, अभ्यस्तात्, शतुः ।
- ‘इदितो नुम् धातोः’ (७.१.५८) इत्यतः ‘नुम्’ इति अनुवर्तते ।
- अभ्यस्तात् परस्य शतुः नुम् न स्यात् ।

- दा (लट्) ल्
- दा (शप्) अ ल् (‘कर्तरि शप्’ - ३.१.६८ - इति शप्)
- दा ल् (‘जुहोत्यादिभ्यः श्लुः’ - २.४.७५ - इति विकरणलोपः)
- दा दा ल् (‘श्लौ’ - ६.१.१० - इति द्वित्वम्)
- द दा ल् (‘ह्रस्वः’ - इति अभ्यासस्य ह्रस्वः)
- द दा (शतृ) अत् (‘लटः शतृशानचौ..’ - ३.२.१२४ - इति लटः शत्रादेशः)
- द द् अत् (‘श्नाभ्यस्तयोरातः’ - इति आल्लोपः)
- ‘ददत्’ इति तकारान्तं प्रातिपदिकम् ।
- ददत्/ददद्, ददतौ, ददतः ।

# ४२८. जक्षित्यादयः षट् (६.१.६)

- पदत्रयम् । जक्ष्, इत्यादयः, षट् ।
- 'उभे अभ्यस्तम्' (६.१.५) इत्यतः 'अभ्यस्तम्' इति अनुवर्तते ।
- षड् धातवः अन्ये जक्षितिश्च सप्तमः एते अभ्यस्तसंज्ञाः स्युः ।

- जक्षत्/जक्षद्, जक्षतौ, जक्षतः ।
- एवं जाग्रत्, दरिद्रत्, शासत्, चकासत् ।
- दीधीवेव्योः ङित्त्वेऽपि छान्दसत्वात् व्यत्ययेन परस्मैपदम् ।
- दीध्यत्, वेव्यत् ।

# पकारान्ताः पुंलिङ्गाः

- ‘गुपू रक्षणे’ इति धातोः क्विप् ।
- गुप्/गुब्, गुपौ, गुपः ।
- गुब्भ्याम् इत्यादि ।